२तापे। करणे उन्। ३पञ्चवृत्तिषु वायुभेदेषु पु०ब०व०। “शेषे जातो भवेद्व्रसुः ज्योति०। “आचम्योदक्‌पराहृत्य विराचम्य शनैरसून्” मनुः। “शरीरेभ्योऽमरारीणामसूनिव विचिन्वति” देवीमा० “त्यजन्त्यसून् शर्म्म च मानिनो वरं त्यजन्ति नत्वेकमयाचितव्रतम्” नैषधम्। प्राणवृत्तीनां भेदविवक्षायामेव बहुत्वम् एकत्वविवक्षायां तु एकवचनान्ततामिच्छन्ति अतएव-“प्राणापानौ समौ कृत्वा” गीता “प्राणोह पिता प्राणोह मातेत्यादौ प्राणशब्दवत् असुशब्दोप्येकवचनः” नानददसुं ऋ० १,१४०,८। “उदीर्ष्वं जीवो असुर्न आगादप” ऋ० १,११३,१६, ४दशगुर्व्वक्षरोच्चारणकाले पलषष्ठभागे च “गुर्व्वक्षरैः खेन्दुमितैरसुस्तैः षड्भिः पलं तैर्घटिका खषड्‌भिः” सि०शि० ५प्रज्ञायाम् निरु०।

**असु** उपतापे कण्ड्वा० यक्। अस्यति आसूयीत् असूयामास। असूया। असूञ इत्येके असूयति ते।

**असुकर** त्रि० सुखेन क्रियते सु+कृ—खल् विरोधे न०त०। दुष्करे।

**असुख** न० विरोधे न०त०। १दुःखे असुखोदयः असुखावहः असुखोदर्कः “तत्तत् प्राप्य सुखासुखम्” गीता “याभ्यां प्राप्नोति संसृष्टाः प्रेत्येह च सुखासुखम्” मनुः। न०ब०। २सुखशून्ये। [१दुर्गमे २दुर्ब्बोधे च।

**असुगम** त्रि० सुखेन गम्यते सु+गम—खल् विरोधे न०त०।

**असुतृप** पु० असुना परकीयप्राणनाशनेन तृप्यति तृप—क ३त०॥ यमदूतभेदे “उरूणसावसुतृपा उदुम्बलौ यमस्य दूतौ चरतोजनाँ अनु” ऋ० १०,१४,१२। [जीवने।

**असुधारण** न० असूनां प्राणादिपञ्चवायुवृत्तीनां धारणम्।

**असुन्दर** त्रि० विरोधे न०त०। सौन्दर्य्यहीने अनुत्कृष्टे कुत्सिते।

**असुन्व** त्रि० सु—अभिषवे बा०श न०त०। सोमाभिषवाकर्त्तरि “असुन्वामिन्द्र। ससंदम्” ८,१५,१४। “असुन्वां सोमाभिषवहीनाम्” भा०।

**असुभृत्** त्रि० असून् बिभर्त्ति भृ—क्विप् ६त०। १प्राणिनि

**असुमत्** त्रि० असवःसन्त्यस्य मतुप्। प्राणिनि “सततमसमतामगम्यरूपाः” माघः।

**असुर** पु० अस—दीप्तौ उरन्। १सूर्य्ये। अस्यति क्षिपति देवान् उर विरोधे न०त० वा। सुरविरोधिनि २दैत्ये। ३रात्रौ स्त्री। असुरप्रभेदाश्च भारते आ०प० दर्शिताः “एकएव दितेः पुत्रो हिरण्यकशिपुः” स्मृतः। नाम्ना ख्यातास्तु तस्येमे पञ्च पुत्रा महात्मनः। प्रह्लादः पूर्व्वजस्तेषां संह्लादस्तदनन्तरम्। अनुह्लादस्तृतीयोऽभूत्तस्माच्च शिविवाष्कलौ। प्रह्लादस्य त्रयः पुत्राः ख्याताः सर्व्वत्र भारत। विरोचनश्च कुम्भश्च निकुम्भश्चेति भारत। विरोचनस्य पुत्रोऽभूद्बलिरेकः प्रतापवान्। बलेश्च प्रथितः पुत्रो वाणो नाम महासुरः। रुद्रस्यानुचरः श्रीमान्महाकालेति यं विदुः। चत्वारिंशद्दनोः पुत्राः ख्याताः सर्व्वत्र भारत। तेषां प्रथमजो राजा विप्रचित्तिर्महायशाः। शम्बरो नमुचिश्चैव पुलोमा चेति विश्रुतः। असिलोमा च केशी च दुर्ज्जयश्चैव दानवः। अयःशिरा अश्वशिरा अश्वशङ्कुश्च वीर्य्यवान्। तथा गगनमूर्द्धा च वेगवान् केतुमांश्च सः। स्वर्भानुरश्वोऽश्वपतिर्वृषपर्व्वाजकस्तथा। अश्वग्रीवश्च सूक्ष्मश्च तुहुण्डश्च महाबलः। एकपादेकचक्रश्च विरूपाक्षमहोदरौ। निचन्द्रश्च निकुम्भश्च कुपटः कपटस्तथा। शरभः शलभश्चैव सूर्य्याचन्द्रमसौ तथा। एते ख्याता दनोर्व्वंशे दानवाः परिकीर्त्तिताः। अन्यौ तु खलु देवानां सूर्य्याचन्द्रमसौ स्मृतौ। अन्यौ दानवमुख्यानां सूर्य्याचन्द्रमसौ तथा। इमे च वंशाः प्रथिताः सत्त्ववन्तो महाबलाः। दनुपुत्रा महाराज दश दानववंशजाः। एकाक्षोऽमृतपो वीरः प्रलम्बनरकावपि। वातापी शत्रुतपनः शठश्चैव महासुरः। गविष्ठश्च वनायुश्च दीर्घजिह्वश्च दानवः। असंख्येयाः स्मृतास्तेषां पुत्राः पौत्राश्च भारत!। सिंहिका सुषुवे पुत्रं राहुं चन्द्रार्कमर्द्दनम्। सुचन्द्रं चन्द्रहन्तारं तथा चन्द्रप्रमर्द्दनम्। क्रूरस्वभावं क्रूरायाः पुत्रपौत्रमनन्तकम्। गणः क्रोधवशो नाम क्रूरकर्म्माऽरिमर्द्दनः। दनायुषः पुनः पुत्राश्चत्वारोऽसुरपुङ्गवाः। विक्षरोबलवीरौ च वृत्रश्चैव महासुरः। कालायाः प्रथिताः पुत्राः कालकल्पाः प्रहारिणः। प्रविख्याता महावीर्य्या दानवेषु परन्तपाः। विनाशनश्च क्रोधश्च क्रोधहन्ता तथैव च। क्रोधः शत्रुस्तथैवान्ये कालकेया इति श्रुताः”। हरिवंशे तु अन्येऽपि बहवोऽसुरभेदा उक्ता यथा। “दित्याः पुत्रद्वयं यज्ञे कश्यपादिति नः श्रुतम्। हिरण्यकशिपुश्चैव हिरण्याक्षश्च वीर्य्यवान्। सिंहिका चाभवत्कन्या विप्रचित्तेः परिग्रहः। सैंहिकेया इति ख्याता यस्याः पुत्रा महाबलाः। गणैश्च सह राजेन्द्र! दशसाहस्रमुच्यते। तेषां पुत्राश्च पौत्राश्च शतशोऽथ सहस्रशः। असंख्याता महाबाहो हिरण्यकशिपोः शृणु। हिरण्यकशिपोः पुत्राश्चत्वारः प्रथितौजसः। अनुह्लादश्च ह्लादश्च प्रह्लादश्चैव वीर्य्यवान्। संह्लादश्च चतुर्थोऽभूत् ह्लादपुत्रो